दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णद्वितीया
माघ 21 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-103 | 1 | फरवरी 03, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 केन्द्रीय-आयव्ययके शिक्षायाः सशक्तोऽधारः - प्रो. श्रीनिवास वरखेड़ी

3 हिमाचलप्रदेशस्य सांसदः अनुरागसिंहठाकुरः अवदत्- राजस्वघाटानुदाने (Revenue Deficit Grant) विषये कांग्रेस-सरकारः प्रदेशं भ्रामयति

5 भारतीयसंस्कृतिरक्षणे दरभंगाराजपरिवारस्य योगदानम्

## द्रौपदीमुर्मुवर्यया प्रदत्तं अभिभाषणम् अधिकृत्य लोकसभया धन्यवादज्ञापन-प्रस्तावे चर्चा कृता



संसदः उभयसदनयोः संयुक्तसम्मेलनाय राष्ट्रपतिना द्रौपदीमुर्मुवर्यया प्रदत्तं अभिभाषणम् अधिकृत्य लोकसभया धन्यवादज्ञापन-प्रस्तावे चर्चा कृता । चर्चायै आहत्य अष्टादश-होराः विनियोजिताः आसन् । प्रस्तावम् उपस्थापयन्, भाजपादलस्य मन्त्री सर्वानन्दसोनोवालः अवदत् यत्, मुर्मुवर्यायाः अभिभाषणं देशस्य भविष्यं प्रति दृष्टिकोणं प्रतिपादयति । सः अकथयत् अनेन अभिभाषणेन सामाजिकसुरक्षायै, निरन्तरवृद्ध्यै, विकसितभारताय च सर्वकारस्य प्रतिबद्धता प्रकाश्यते ।

## ओडिशा, छत्तीसगढ इत्येतयोः राज्ययोः षड्दिवसानां यात्रायाम् अस्ति -राष्ट्रपतिः

राष्ट्रपतिः द्रौपदीमुर्मूवर्या दिवसात् आरभ्य ओडिशा, छत्तीसगढ इत्येतयोः राज्ययोः षड्दिवसानां यात्रायाम् अस्ति । अद्य सायङ्काले सा पूर्वनिर्धारितस्य यात्राकार्यक्रमस्य अन्तर्गतं भुवनेश्वरं प्राप्स्यति। आगामिषु केषुचित् दिनेषु राष्ट्रपतिवर्या ओडिशा-राज्ये धार्मिक शैक्षणिक विकासात्मकानि विविधानि कार्याणि सम्पादयिष्यति।

## राष्ट्रपत्याः धन्यवादचर्चायाः विस्तारः दिनत्रयं यावत् भविष्यति - किरेनरिजीजूः



संसदीय कार्यमन्त्री किरेनरिजीजूः उक्तवान् यत् लोकसभायां राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावस्य चर्चायै संसदः उभयसदनयोः संयुक्तसम्मेलनस्य कृते आहत्य अष्टादश-होराः विनियोजिताः सन्ति । संसदः बहिः वार्ताकारैः सह वार्तालापं कुर्वन् श्रीरिजिजुः अवदत् यत्, चर्चायाः विस्तारः दिनत्रयं यावत् भविष्यति, प्रधानमन्त्रिणा नरेन्द्रमोदिना बुधवासरे लोकसभायां चर्चायाः उत्तरं प्रदास्यते ।

## जगदंबिकापालः राहुलगान्धिनं विरुद्धय कार्याचरणं विधातुं अध्यर्थितवान्

भाजपादलस्य सांसदा जगदंबिकापालः इत्येषः लोकसभायां कोलाहलं कर्तुं लोकसभाध्यक्षस्य ओम्-बिर्ला-वर्यस्य निर्णयं नानुपालयितुं विपक्षनेतारं राहुलगान्धिनं विरुद्धय कार्याचरणं विधातुं अध्यर्थितवान् । आकाशवाणी-न्यूस् इत्यनेन सह वार्तालापं कुर्वन् श्रीपालः अवदत् यत् गान्धीवर्यः पूर्वसेनाप्रमुखस्य एम्.एम्. नरवणे इत्यस्य पुस्तक-विषये उल्लेखं करोति यत् अद्यापि न प्रकाशितम्। श्रीपालः इत्यपि अवदत् यत् रक्षामन्त्री राजनाथसिंहः, गृहमन्त्री अमितशाहः च अपि आक्षेपं कृतवन्तौ, यत् राहुल-महोदयः अप्रकाशितस्य पुस्तकस्य उल्लेखं न कुर्युः ।

## ईरानेन इस्लामिक रिपब्लिक इत्यत्र प्रतिष्ठितस्य यूरोपियन यूनियन इत्यस्य राजदूताः समाहूताः



ईरानेन इस्लामिक रिपब्लिक इत्यत्र प्रतिष्ठितस्य यूरोपियन यूनियन इत्यस्य राजदूताः समाहूताः येन पैरामिलिट्री-रिवोल्यूशनरी-गार्ड इत्येत् आतङ्कवादि-सङ्घटनम् उद्घोषयितुं कृतस्य निर्णयस्य विरोधः क्रियात् । ईरानस्य विदेश मंत्रालयस्य प्रवक्ता इस्माइल बगाई इत्यनेन पत्रकाराः कथिताः यत् आह्वानप्रक्रिया गतदिवसे समारब्धा या अद्यापि प्रचलिष्यति ।

## केन्द्रीय-आयव्ययकेन मध्यमर्गीयेभ्यः लाभं प्रदास्यते -डा. जितेन्द्रसिंहः



केन्द्रीय-आयव्ययकं भविष्यवादी इति सम्बोधयन् विज्ञान-विकास-तन्त्रज्ञानमन्त्री डा. जितेन्द्रसिंहवर्यः अवदत् यत्, एतत् आयव्ययकं शताब्दस्य अग्रिम-चतुर्थांशस्य मार्गचित्रं निर्दिशति । नवदेहल्यां पत्रकारसम्मेलनं सम्बोधयन् डा. सिंह-वर्यः अकथयत् यत् बायो-फार्मा-शक्तिः इत्यर्थ दश-सहस्रकोटि-रूप्यकाणां प्रबंधनेन जैवनिर्माणक्षेत्रे भारतस्य स्थानं सुदृढं भविष्यति ।

## अमेरिका-भारत-रणनीतिक सहयोग-मञ्चेन केन्द्रीय-आयव्ययकम् इत्येतत् प्रशंसितम्




अमेरिका-भारत-रणनीतिक सहयोग-मञ्चेन केन्द्रीय-आयव्ययकम् इत्येतत् प्रशंसितं, भारतस्य सुदृढ-प्रतिस्पर्धात्मकतायाः, निवेश-वर्धनस्य, व्यापारसुगमतायाः च प्रगतिशील मार्गचित्रम् एतत् वर्णितम् । वित्तमन्त्री निर्मला सीतारमणवर्या संसदि आगामि वित-वर्षस्य केन्द्रीय-आयव्ययकम् उपस्थापितवती येन विनिर्माणस्य, अवसंरचनायाः, आजीविकायाः च कृते प्रबलं प्रोत्साहनं प्रदत्तम् अपि च सरलतया करस्य सीमाशुल्कस्य च व्यवस्थायाः प्रस्तावः कृतः । स्टेट्-बेड्क्-आफ्-इण्डिया इत्यस्य अध्यक्षः चल्ला-श्रीनिवासुलु-सेट्टी इत्येषः अकथयत् यत् केन्द्रीय-आयव्ययकं वैश्विक प्रतिस्पर्धात्मकतया सह भारतं नवान्वेषणस्य उन्नत-विनिर्माणस्य च वैश्विक केन्द्ररूपेण निर्मातुं महत्त्वपूर्ण सोपानम् अस्ति । देहल्याः मुख्यमन्त्रिवर्या रेखा-गुप्ता इत्येषा अकथयत् यत्, केन्द्रीय-आयव्ययकं युवभ्य, महिलाभ्यः, मध्यमवर्गाय अवसरान् प्रददाति, तथा च देशस्य अर्थव्यवस्थां सुदृढीकर्तुं स्पष्टं मार्गचित्रं प्रस्तौति ।

## सुभाषितम्

**अलिरनुसरति परिमलं,**
**लक्ष्मीरनुसरति नयगुणसमृद्धिम्।**
**निम्नमनुसरति सलिलं,**
**विधिलिखितं बुद्धिरनुसरति।।**

भावार्थः- एक मधुमक्खी सुगन्ध से आकर्षित हो कर उसी ओर जाती है। धन की अधिष्ठात्री देवी लक्ष्मी भी बुद्धिमान, गुणवान और समृद्ध व्यक्ति का ही अनुसरण करती है। जल अपनी वर्तमान स्थिति से सदैव नीचे की ओर ही प्रवाहित होता है तथा मनुष्य की बुद्धि जो कुछ उसके भाग्य में लिखा हुआ होता है उसी के अनुसार आचरण करती है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## भारत-एआई. शिखरसम्मेलनम्

नवदिल्ल्यां अस्य मासस्य षोडष-दिनाङ्कात् आरभमाणेन भारत-ए.आई. शिखरसम्मेलनेन पञ्चत्रिंशत्-सहस्रात् अधिकानि पञ्जीकरण-पत्राणि प्राप्तानि । इलेक्ट्रानिक्स् एण्ड आई. टी. इति मन्त्रालयेन सूचितं यत् पञ्चदिवसीये कार्यक्रमे पञ्चदश-तः विंशति यावत् सर्वकारीयाः प्रमुखाः, विविध-देशानां मन्त्रिणः, प्रमुख-वैश्विकानां भारतीयानाम् च उद्योगसंस्थानानां चत्वारिंशत्-तः अधिकाः सी. ई. ओ. इत्येते संस्थाप्रमुखाः , शतं संख्याकाः देशाः च भागं ग्रहीष्यन्ति ।

# केन्द्रीय-आयव्ययके शिक्षायाः सशक्तोऽधारः भारतीयज्ञानपरम्परायाः उच्चशिक्षायाः विश्वविद्यालय-उपनगराणां च भविष्यति नूतनविस्तारः – प्रो. श्रीनिवास वरखेड़ी



हिमसंस्कृतवार्ताः- नवदेहली। केन्द्रीयवित्तमन्त्रिण्या निर्मलासीतारमणमहोदयया संसदि प्रस्तुते केन्द्रीय-आयव्ययके-२०२६ मध्ये शिक्षाक्षेत्राय विशेषप्राथमिकता प्रदत्ता अस्ति। शिक्षाक्षेत्रेण सह सम्बद्धानां विविधानां दूरगामिनीनां घोषणानां केन्द्रीयसंस्कृतविश्वविद्यालयेन स्वागतं कृतम्। विश्वविद्यालयेन एताः घोषणाः उच्चशिक्षायाः, भारतीयज्ञानपरम्परायाः, राष्ट्रनिर्माणस्य च दिशि सक्षमाः समन्विताः च उपक्रमाः इति वर्णिताः। आयव्ययके- २०२६ मध्ये शिक्षा- सशक्तिकरण- उद्यमिताविकासार्थम् उच्चस्तरीयसमित्याः गठनं, भारतीयज्ञानपरम्परायाः सुदृढीकरणं, विश्वविद्यालय-आधारित- समग्र- शैक्षणिक- विकासः 'विश्वविद्यालय-उपनगर' (University Township) इति अवधारणा उच्चशिक्षाक्षेत्रे दूरगामि राष्ट्रोन्मुखं च पदमिति केन्द्रीय- संस्कृत- विश्वविद्यालयेन अभिहितम्। केन्द्रीय- संस्कृत- विश्वविद्यालयस्य कुलपतिना प्रो. श्रीनिवास वरखेड़ी महोदयेन उक्तं यत्-

> "यशस्विनः प्रधानमन्त्रिणः नरेन्द्रमोदीमहोदयस्य मार्गदर्शने केन्द्रीयशिक्षामन्त्रिणः धर्मेन्द्रप्रधानस्य कुशलनेतृत्वे, अस्मिन् आयव्ययके शिक्षां ज्ञान- कौशल- नवाचार- उद्यमिताभिः सह संयोज्य राष्ट्रनिर्माणस्य प्रभावी माध्यमं कर्तुं स्पष्टा दृष्टिः दृश्यते।"

> प्रो. वरखेड़ी महोदयेन प्रतिपादितं यत् भारतीयज्ञानपरम्परां राष्ट्रियशिक्षाव्यवस्थायाः केन्द्रे स्थापयितुं निर्णयः भारतस्य प्राचीनायाः समृद्धायाश्च बौद्धिकविरासत्याः संरक्षणाय, संवर्धनाय, वैश्विकप्रतिष्ठायै च ऐतिहासिकं पदमस्ति। अनेन संस्कृत- योग- आयुर्वेद- दर्शन- गणित- खगोलविज्ञानादीनां भारतीयभाषाणां च ज्ञानं समकालीन- अनुसन्धान-नवाचारैः सह संयोज्य जागतिकस्तरे प्रतिष्ठितं भविष्यति।

# वनक्षेत्रं ३१ प्रतिशतं कर्तुं कार्ययोजनां सज्जीकुरुत- मुख्यमन्त्रिणः अधिकारिभ्यः निर्देशाः





हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्री सुखविन्द्रसिंहसुक्खूः वनविभागं निर्देशितवान् यत् २०३० वर्षपर्यन्तं हिमाचलप्रदेशे वनक्षेत्रस्य विस्तारं कृत्वा तद् ३१ प्रतिशतपर्यन्तं नयितुं विस्तृता कार्ययोजना सिद्धा करणीया। सोमवासरे वनविभागस्य समीक्षा-समितेः अध्यक्षतां कुर्वन् सः अवदत् यत् सम्प्रति राज्यस्य वनक्षेत्रं २९.५ प्रतिशतम्O अस्ति, यत् योजनाबद्धेन तथा सततमार्गेण वर्धनीयम्। मुख्यमन्त्री अवदत् यत् वैश्विकतापनम् (Global Warming) अधुना विश्वव्यापिनी समस्या अभवत्, तस्य च प्रतिकूलप्रभावाः स्पष्टतया दृश्यन्ते। एतस्मिन् परिप्रेक्ष्ये वर्तमानराज्यसर्वकारः पर्यावरणसंरक्षणाय सर्वोच्चां प्राथमिकतां ददाति। हिमाचलप्रदेशे प्रायः १६,३७६ वर्गकिलोमीटरपरिमाणं क्षेत्रं हिमाच्छादितं, बंजरं अथवा पर्वतीयम् अस्ति, यत्र पौधारोपणं सम्भवम् नास्ति। अतः वनविभागेन प्रत्येकस्मिन् जिलि पौधारोपणाय योग्यसंभाव्यस्थानानां परिचयः कर्तव्यः, तदनुसारं चरणबद्धा पौधारोपणयोजना निर्मातव्या। सः देशीयप्रजातीनां, फलदारवृक्षाणां तथा औषधीयमहत्त्वयुक्तानां वनस्पतीनां रोपणे विशेषं बलं दत्तवान्।

### विद्यमानवनानां संरक्षणेऽपि ध्यानं दातव्यम्- सुक्खु

सुक्खुः अवदत् यत् विभागेन केवलं नूतनवनविस्तारे एव न, अपि तु विद्यमानवनानां संरक्षणेऽपि सम्यक् ध्यानं दातव्यम्। तदस्मिन् एव, वनसंरक्षणस्य दिशि स्थानीयजनानां समुदायानां च सक्रियसहभागिता सुनिश्चितीकरणीयम्। प्रदेशे सामुदायिकसहभागितया पौधारोपणं संरक्षणं च प्रोत्साहयितुं राज्यसरकारेण राजीवगान्धी वनसंवर्धनयोजना प्रवर्तिता अस्ति। अस्यां योजनायां गतवर्षे ९२४.९ हेक्टेयरपरिमाणे क्षेत्रे पौधारोपणं कृतम्। अत्र कुलं २८५ महिलामण्डलानि, ७० युवक-मण्डलानि, ५९ स्वयंसहायता-समूहाः तथा १३ समुदायाधारित-संस्थाः सक्रियं योगदानं दत्तवन्तः। योजनान्तर्गतं सरकारः द्विहेक्टेयरपरिमाणे क्षेत्रे पौधारोपणाय २.४० लक्षरूप्यकाणां वित्तीयसहाय्यां ददाति, तथा च पौधानां जीविततादरानुसारं वार्षिकं प्रोत्साहनधनम् अपि प्रदत्ते।

### ५,००० हेक्टेयरक्षेत्रे वृक्षारोपणस्य लक्ष्यम्

ग्रामीणस्तरे अस्यां योजनायां लक्षितसमूहेभ्यः उत्साहजनका प्रतिक्रिया प्राप्ता अस्ति। मुख्यमन्त्री अवदत् यत् आगामी वित्तवर्षे राजीवगान्धी वनसंवर्धनयोजनाया अन्तर्गतं ५,००० हेक्टेयरपरिमाणे क्षेत्रे वृक्षारोपणस्य लक्ष्यं निर्धारितम् अस्ति। एतेषु ३,३७६ हेक्टेयरपरिमाणं क्षेत्रं पूर्वमेव चिन्हितम् अस्ति, शेषस्य १,६२४ हेक्टेयरपरिमाणस्य क्षेत्रस्य परिचयनप्रक्रिया अद्यापि प्रचलति। सः वनविभागेन सञ्चालितानाम् अन्ययोजनानां प्रगतिम् अपि समीक्षितवान्। अस्यां बैठके अतिरिक्तमुख्यसचिवः के. के. पन्तः, पीसीसीएफ (हॉफ) सञ्जयसूदः तथा वनविभागस्य अन्ये वरिष्ठाः अधिकारिणः उपस्थिताः आसन्

# सर्वोच्चन्यायालयेन पेन्नैयार्-नद्याः जलविभाजन-विषये तमिळुनाडु-कर्नाटकयोः मध्ये दीर्घकालं यावत् विलम्बितस्य विवादस्य न्यायनिर्णयं कर्तुम् न्यायाधिकरणम् निर्मातुं केन्द्रसर्वकाराय आदेशः दत्तः

सर्वोच्चन्यायालयेन पेन्नैया-नद्याः जलविभाजन-विषये तमिळुनाडु-कर्नाटकयोः मध्ये दीर्घकालं यावत् विलम्बितस्य विवादस्य न्यायनिर्णयं कर्तुम् न्यायाधिकरणम् निर्मातुं केन्द्रसर्वकाराय आदेशः दत्तः। सर्वोच्चन्यायालयेन केन्द्र-सर्वकाराय एकमासाभ्यन्तरं अधिसूचनां प्रकाशितुं, जलविवाद-न्यायाधिकरणस्य निर्माणं कर्तुं च आदेशः प्रदत्तः।

# राहुलगान्धिना प्रदत्तं वक्तव्यं विरुध्य संसदि प्रवर्तमानेन कोलाहलेन त्रिवारं बाधितं जातम्

लोकसभायाः कार्याचरणं राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावस्य समये पूर्वसेना प्रमुखस्य एम्. एम्. नरवणे इत्यस्य अप्रकाशित पुस्तकस्य विषये विपक्षिदलस्य नेतृणा राहुलगान्धिना प्रदत्तं वक्तव्यं विरुध्य संसदि प्रवर्तमानेन कोलाहलेन त्रिवारं बाधितं जातम्। अपराह्णे चतुर्वादने द्वितीय-स्थगनस्य अनन्तरं यदा सभा पुनरारभत्, तदा गान्धिमहोदयः पुनः अप्रकाशितं पुस्तकम् अधिकृत्य टिप्पणिम् अकरोत्, यां विरुध्य कोषपीठस्य सदस्याः आक्षेपं कृतवन्तः। पीठासीन अधिकारी श्रीगान्धी-वर्य अध्यक्षनिर्णयस्य स्मरणं कारयित्वा धन्यवादप्रस्तावस्य विषये प्रतिबद्धः भवितुम् आग्रहम् अकरोत्। संसदीयकार्यमन्त्री किरेन रिजिजुः अपि गान्धी-वर्य केवलं धन्यवादप्रस्तावे एव वक्तुं प्रार्थयत्। अध्यक्षस्य पुनः पुनः आग्रहेणापि, गान्धिमहोदयः पुनः तत् विषयम् उल्लेखितवान्, यस्य कारणात् श्वः प्रातः एकादश-वादनं यावत् सभायाः स्थगनम् अभवत्। पूर्वं, यदा गान्धिमहोदयः तस्य पुस्तकस्य विषये उक्तवान्, तदा रक्षामंत्री राजनाथसिंहः गान्धी-महोदयस्य आरोपं प्रख्यापयत् यत् सः काल्पनिकांशान् उद्धृत्य सभां भ्रमयति, ये तथ्यात्मकरूपेण सत्याः न सन्ति। एतादृशानां वक्तव्यानां विषये असहमतिं प्रकटयन् संसदीय कार्यमन्त्री किरेन रिजिजुः अवदत् यत्, राहुलमहोदयः सेनायाः अपमानम् न कुर्यात्। कोलाहल-कारणेन लोकसभायाः कार्याचरणम् अपराह्णे चतुर्वादनं यावत् स्थगितम्

# केन्द्रीय-युव-कार्य-क्रीडामन्त्री डा. मनसुखमाण्डवीयः माई. भारत्-बड्जट्-क्वेस्ट् 2026 इत्यस्य आरम्भं कृतवान्

केन्द्रीय-युव-कार्य-क्रीडामन्त्री डा. मनसुखमाण्डवीयः विकसित-भारत-युवनेतृणां संवादस्य सफलतायाः अनन्तरं, माई. भारत्-बड्जट्-क्वेस्ट् 2026 इत्यस्य आरम्भं कृतवान्। श्वः आरभ्यमानस्य राष्ट्रव्यापि-युव-केन्द्रित-उपक्रमस्य उद्देश्यं, देशस्य युवजनैः केन्द्रीय-आयव्ययिकस्य अवबोधनं कारयितुं, आयव्ययिक-उपबन्धान् सुलभतरं, सम्बद्धं, नागरिक केन्द्रितं च कर्तुं निर्धारितम् अस्ति। एषः उपक्रमः संरचित-सहभागितापूर्ण-संरचनायाः माध्यमेन, सम्पूर्णं देशे महाविद्यालयानां, संस्थानां, प्रशिक्षणकेन्द्राणां च युवान् योजयित्वा, नागरिकानां दैनन्दिन-जीवनेन सह आयव्ययिकं योजयितुं प्रयतते। डा. माण्डवीयः अवदत् यत् प्रतियोगितायाः प्रथम-प्रक्रमः अस्मिन् मासे सप्तदश-दिनाङ्क-पर्यन्तं माई भारत् पोर्टल् इत्यत्र पञ्जीकृतानां युवानां कृते उद्घाटितः भविष्यति।

# हिमाचलप्रदेशस्य सांसदः अनुरागसिंहठाकुरः अवदत्- राजस्वघाटानुदाने (Revenue Deficit Grant) विषये कांग्रेस-सरकारः प्रदेशं भ्रामयति




**हिमसंस्कृतवार्ताः-** शिमला।पूर्वकेन्द्रीयमन्त्री, हमीरपुरलोकसभाक्षेत्रात् भाजपासांसदः अनुरागसिंहठाकुरः मुख्यमंत्री सुखविन्द्रसिंहसुक्खुना राजस्वघाटानुदानस्य (आरडीजी) षोडशवित्तायोगेन निरसनविषये याः टिप्पण्यः कृताः, ताः भ्रमप्रदाः इति निरूपितवान्। सोमवासरे निर्गते वक्तव्ये अनुरागसिंहठाकुरः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदीनां नेतृत्वे केन्द्रीयसर्वकारः सदैव हिमाचलप्रदेशस्य हितेषु विशेषं ध्यानं दत्तवती। कदापि कस्यापि प्रकारस्य न्यूनता न आगता। एतत् दुःखदं यत् राजस्वघाटानुदानस्य विषये कांग्रेस-सरकारः प्रदेशजनान् भ्रमयति। सः अवदत् यत् कांग्रेस-सर्वकारः स्वस्य वित्तीयकुप्रबन्धनस्य दोषं केन्द्रे आरोपयति। अनुरागठाकुरः अवदत् यत् नवीनसूत्रेण हिमाचलप्रदेशस्य अंशः वस्तुतः वर्धितः अस्ति। राजस्वघाटानुदानं न स्थायी व्यवस्था, अपि तु अस्थायी व्यवस्था आसीत्, तथा च षोडशवित्तायोगेन सामान्य-आरडीजी विषये अनुशंसा न कृता। हिमाचलसहितेषु अनेकसु अनुदानप्राप्तेषु राज्येषु अल्पप्रयत्नाः तथा उच्चप्रतिबद्धव्ययस्य प्रवृत्तिः दृष्टा। हिमाचलप्रदेशस्य डिवोल्यूशनं न न्यूनं, अपि तु वर्धितम् अस्ति। अन्यायपूर्णकटनस्य विषये कांग्रेसस्य शून्यदावानां विपरीतम्, षोडशवित्तायोगेन हिमाचलप्रदेशस्य विभाज्यकोषे अंशः पञ्चदशवित्तायोगस्य ०.८३० प्रतिशतात् वर्धयित्वा ०.९१४ प्रतिशतं कृतम्। नवीनसूत्रेण हिमाचलप्रदेशस्य पोस्ट- डिवोल्यूशन-प्राप्तिः २०२५-२६ वित्तवर्षस्य बजट- अनुमाने प्रायः ११,५६१.६६ कोटिरूप्यकेभ्यः वर्धयित्वा १३,९४९.९७ कोटिरूप्यकाणि अभवत्, यत् प्रायः २,३८८ कोटिरूप्यकाणां वृद्धिः अस्ति। एषा केन्द्रीयकर-डिवोल्यूशनमध्ये महत्त्वपूर्णा वृद्धिः अस्ति। पञ्चदशवित्तायोगकाले कोविडपश्चात् राज्यानां पुनरुत्थानाय आरडीजी अग्रिमरूपेण प्रदत्तम् आसीत्, यत् स्पष्टतया कालबद्धं संक्रमणकालीनम् उपायम् आसीत्, यस्य उद्देश्यं २०२५-२६ पर्यन्तं राज्येषु प्रायः शून्यराजस्वघाटं साधयितुम् आसीत्।अनुरागठाकुरः अवदत् यत् षोडशवित्तायोगेन परिणामानां समीक्षा कृता, तथा निष्कर्षः कृतः यत् चतुर्दशवित्तायोगात् पञ्चदशवित्तायोगपर्यन्तं विशाल- आरडीजी-हस्तान्तरणानां सत्त्वेऽपि वास्तविकराजस्वन्यूनता-सामान्यस्थितिं न प्राप्तवती, यतः अनेकैः राज्यैः राजस्वसंग्रहः न सुदृढीकृतः, न च व्ययः युक्तिसंगतः कृतः। अतः सामान्य- आरडीजी- निरन्तरता प्रतिकूला इति मन्यते, यतः सा विकृतप्रेरणाः उत्पादयितुं शक्नोति तथा संरचनात्मकसुधाराणां दबावं न्यूनयति।अनुरागसिंहठाकुरः अवदत् यत् मोदी-सरकारः राज्येषु भेदभावं न करोति। षोडशवित्तायोगसूत्रेण विपक्षशासितेषु अपि अनेकसु राज्येषु डिवोल्यूशनवृद्धिः अभवत्। षोडशवित्तायोगेन प्रवर्तिते क्षैतिजपुनर्वितरणे मापदण्डानां पुनर्वेटेज् कृतम्, यत्र जनसंख्या/जनसांख्यिकीय-प्रदर्शनाय भारः वर्धितः, सकल- घरेलु- उत्पादे योगदानाय १० प्रतिशतवेटेज योजितम्, क्षेत्रफलस्य भारः तु न्यूनीकृतः। एतेन अनेकानि राज्याः लाभान्विताः, येषु विपक्षशासितराज्यानि अपि सन्ति, अन्येषु केषुचित् न्यूनता अपि अभवत्। अतः षोडशवित्तायोगस्य समायोजनं पक्षपातपूर्णं कर्म इति चित्रणं न युक्तम्।

## आयोगस्य निर्णयं

### प्रभावितवन्तः मापदण्डाः-

अनुरागठाकुरः अवदत् यत् २०२३-२४ वित्तवर्षे हिमाचलप्रदेशस्य स्वकीयकरराजस्वं जीएसडीपीस्य प्रायः ५.६ प्रतिशतं आसीत्, यदा उत्तराखण्डस्य स्वकीयकरप्रयत्नः प्रायः ६.१ प्रतिशतं आसीत्। एषः भेदः महत्त्वपूर्णः। उच्चकरप्रयत्नेन केन्द्रहस्तान्तरणेषु निर्भरता न्यून्यते। हिमाचलप्रदेशस्य कुलराजस्वव्ययः जीएसडीपीस्य प्रायः २१.० प्रतिशतं आसीत्, यदा उत्तराखण्डस्य १५.० प्रतिशतं आसीत्, यत् दर्शयति यत् हिमाचले आवर्तिबद्धप्रतिबद्धताः अधिकाः सन्ति, ये विकासव्ययं सीमितं कुर्वन्ति। हिमाचले २०२३-२४ मध्ये जीएसडीपीस्य ५.३ प्रतिशतं राजकोषीयघाटः, २.६ प्रतिशतं राजस्वघाटः आसीत्, यदा उत्तराखण्डे राजकोषीयघाटः २.५ प्रतिशतं, राजस्व- अधिशेषः १.१ प्रतिशतम् आसीत्। निरन्तरराजस्वघाटः स एव दोषः अस्ति, यस्य निवारणाय आरडीजी निर्मिताः, न तु तेषां संरक्षणाय।सः अवदत् यत् हिमाचलप्रदेशस्य बकायादायित्वानि २०२३-२४ मध्ये जीएसडीपीस्य प्रायः ४२.८ प्रतिशतम् आसीत्, यदा उत्तराखण्डस्य २५.५ प्रतिशतम् आसीत्। उच्चऋणेन व्याजभुगतानं वर्धते, वित्तीयलचीलता च न्यून्यते। हिमाचलप्रदेशे कुलव्यये पूंजीगतव्ययस्य अंशः अन्यराज्येभ्यः तुलनया न्यूनः अस्ति, यत् सूचयति यत् बजटस्य बृहदंशः राजस्वव्यये तथा ऋणसेवायां उपभुज्यते, न तु उत्पादकनिवेशे। एतेषां मापदण्डानां कारणेनैव षोडशवित्तायोगेन निर्णयः कृतः यत् संरचनात्मकवित्तीयदुर्बलताः आच्छादयन्तं सामान्य-आरडीजी निरन्तरं करणं युक्तं नास्ति। अनुरागसिंहठाकुरः अवदत् यत् आयोगस्य अनुशंसाः एतासु मापनीयासु वित्तीयवास्तविकतासु आधारिताः सन्ति, न तु पक्षपातपूर्णविचारेषु अथवा कांग्रेसस्य निराधारवक्तव्येषु।

# हिमाचलस्य राजस्व-हानि-अनुदानं (RDG) स्थगितम्; मुख्यमन्त्री सुक्खू महोदयः मन्त्रिमण्डल-उपवेशनं आहूतवान्



**हिमसंस्कृतवार्ताः - शिमला।**

१६-तमे वित्त-आयोगेन राजस्व-हानि-अनुदानं (Revenue Deficit Grant) समाप्तं कृतम्, यस्य कारणेन हिमाचलप्रदेशस्य वित्तीय-स्थितिः चिन्ताजनका वर्तते। अस्मिन् विषये चर्चां कर्तुं मुख्यमन्त्री सुखविन्दरसिंहसुक्खू महोदयः ८ फरवरी दिनाङ्के प्रातः ११ वादने मन्त्रिमण्डलस्य (Cabinet) महतीं गोष्ठीं आहूतवान्।

## मन्त्रिमण्डल-उपवेशनस्य प्रमुखाः विषयाः

केन्द्रसर्वकारेण स्थगितं राजस्व-हानि-अनुदानं पुनः आरब्धुं (Restore) एकः सङ्कल्पः अस्मिन् उपवेशने पारितः भविष्यति।

संविधानस्य अनुच्छेद २७५-१ अन्तर्गतं राज्याय विशिष्ट-अनुदानस्य प्रावधानं वर्तते। राज्यसर्वकारस्य मतमस्ति यत् १९५२ तः १५-तम-वित्त-आयोगपर्यन्तं हिमाचलप्रदेशः निरन्तरं एतत् अनुदानं प्राप्तवान् अस्ति।

राज्यस्य ऋण-ग्रहण-सीमाम् (Borrowing Limit) वर्धयितुं तथा च प्रधानमन्त्रिणा घोषितं १५०० कोटिरूप्यकाणां राशिं प्राप्तुं चर्चा भविष्यति।

प्रतिवर्षं प्राप्तमानायाः प्रायः १० सहस्रकोटिरूप्यकाणां राशेः स्थगनेन राज्यस्य विकासे कीदृशः प्रभावः भविष्यति, इति विषये गहनतया विमर्शः भविष्यति।

### बजट्-पूर्व-सिद्धताः (Pre-Budget Preparations):

आगामी-बजट (२०२६-२७) कृते मुख्यमन्त्री सर्वेषां जनपदानाम विधायकैः सह मिलिष्यति। अत्र वित्तीय-संसाधनानां वृद्धये, व्यय-नियन्त्रणाय च परामर्शः स्वीकरिष्यते।

वित्तविभागेन सामान्यजनानां, कृषकाणां, व्यापारिणां च कृते एकं विशिष्टं 'वेब-पोर्टल्' आरब्धम्। जनाः १० फरवरी दिनाङ्कपर्यन्तं स्वपरामर्शान् दातुं शक्नुवन्ति।

राज्यसर्वकारस्य धारणा अस्ति यत् राजस्व-हानि-अनुदानस्य स्थगनेन हिमाचलस्य 'आत्मनिर्भरता' लक्ष्याय महती बाधा उत्पन्ना भविष्यति। यद्यपि विभाज्य-पुले (Devisible Pool) हिमाचलस्य अंशः ०.८३०% तः वर्धयित्वा ०.९१४% कृतः, तथापि अनुदानस्य समाप्तिः चिन्तायाः विषयः अस्ति।

# प्रोफेसर पी. के. खोसला 'स्थायी-शिक्षा-उद्यमी' सम्मानेन अलङ्कृतः

**हिमसंस्कृतवार्ताः - सोलनम्।**

शूलिनी-विश्वविद्यालयस्य संस्थापकाय कुलाधिपतये प्रो. पी. के. खोसला महोदयाय 'री-थिंक इण्डिया फाउण्डेशन' (Re-Think India Foundation) इत्यनया संस्थया आयोजितस्य 'समृद्धि २०२५' इति कार्यक्रमे 'स्थायी-शिक्षा-उद्यमी' (Sustainable Education Entrepreneur) इति सम्मानेन गौरवान्वितं कृतम्।

**सम्मानस्य महत्त्वम्** १. अयं सम्मानः महामना मदनमोहनमालवीयमहोदयस्य आदर्शैः प्रेरितः अस्ति।

२. उच्चशिक्षायाः क्षेत्रे तथा च नूतन-संस्थानां निर्माणे प्रो. खोसला महोदयस्य दीर्घकालिक-योगदानस्य एषा महती मान्यता अस्ति।




३. एषः पुरस्कारः प्रो. खोसला महोदयस्य तस्य जीवनयात्रायाः सम्मानं करोति, यत्र सः स्वस्य पत्न्याः च आजीवन-सञ्चित-धनं 'शूलिनी इन्स्टीट्यूट् ऑफ लाइफ साइंसेज एण्ड बिजनेस मैनेजमेण्ट्' इति अलाभकारी-संस्थायाः (Non-profit) स्थापनायै विनियोजितवान्।

इयं महदारम्भः प्रो. खोसला महोदयस्य हिमाचलप्रदेश-कृषि-विश्वविद्यालयस्य (पालमपुरस्य) कुलपति-रूपेण कार्यकालस्य अनन्तरं तथा च हिमाचल-सर्वकारस्य वरिष्ठ-वैज्ञानिक-परामर्शदातृ-रूपेण (Senior Scientific Advisor) भूमिकायाः पश्चात् आरब्धः आसीत्।




✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# धर्मो रक्षति रक्षितः

यः जीवने धर्मस्य रक्षणं करोति, स हि रक्षितः धर्मः तं प्रतिरक्षतीति शीर्षकस्य आशयः । 'धारणाद्धर्ममित्याहुः' इत्यर्थात् यः धारणयोग्यः, यस्य धारणेन मनुष्यः भुक्तिमुक्त्यादिसम्पन्नं सुखमयं जीवनं यापयितुमर्हति स धर्मः उच्यते। जीवनधारणस्य उत्तमा कला हि धर्मः । धर्मः इत्ययम् अन्येभ्यः शिक्षादिविषयेभ्यः भिन्नः इति अल्पज्ञानिभिः चिन्त्यते, परन्तु न तत्सत्यम् । मानवजीवने आहरणयोग्या, कल्याणप्रदा, शान्तिप्रदा च, या सच्छिक्षा, वस्तुतः सा हि धर्मनाम्ना आख्यायते । भारतवर्षस्य प्राणरूपः नाम धर्मः हि, धर्मः हि शिक्षायाः मूलम् । धर्मः नाम सज्जनता, मनुष्यत्वं वा । धर्मज्ञानविहीना शिक्षा पशुज्ञानवत् । अद्यतन्यां शिक्षायां धर्मचिह्नं हि नावलोक्यते । विश्वविद्यालयादीनां पाश्चात्योपेतशिक्षायाः कारणतः अधुना भारतीयधर्मसंस्कृतिः प्रायः विलुप्ततां गतास्ति इति दृश्यते ।

पूर्वं गुरुकुलादिषु बालेभ्यः या मानवीया, नैतिकशिक्षा दीयते स्म, सा आधुनिक-शिक्षाप्रणाल्यां दुर्लभतां गतास्ति । तस्य परिणामतः, संयमस्य अभावतः च अधुना सर्वत्र व्यभिचारः हि प्रसृतः अवलोक्यते । केवलम् अर्थकरी विद्या न वास्तविकी शिक्षा । परम्परया आगता या त्यागमयी जीवनशैली, सा अधुना भोगमयी सञ्जाता अस्ति । मानसिक-परतन्त्रता हि समस्त-समस्यानां मूलम् । भारतवासिनः शनैः स्वकीयं मनः, मस्तिकञ्च पाश्चात्यसंस्कृत्यै समर्पितवन्तः सन्ति इति तु अवितथमेव । कारणं तेभ्यः परसंस्कृतिर्हि आधिक्येन रोचते, न वा स्वसंस्कृतिः ।

वर्तमाने समुचितशिक्षायाः नितराम् अभावः अस्ति । पाठ्यपुस्तकेषु नीतिशिक्षाया अभावः, तत्र धर्मसदाचारादीनान्तु गन्धः अपि न प्राप्यते । एवञ्चेत् भारतीयानाम् अध्यापक-विद्यार्थिनां कृते तत्समुपयोगिनी शिक्षा कथं स्यात् ? अहो, सर्वं विहाय कृत्रिमयुगं, बाह्यप्रदर्शनयुगं वा हि समागतमस्ति अधुना । बाह्याचरणं केवलं सर्वेषु क्षेत्रेषु । वास्तविकं कर्तव्यं किमिति विषये अज्ञानता।

नैव सोढुं शक्यते एतादृशी जनस्थितिः । पूर्ववत् सनातनधर्मस्य जागरणं, शास्त्राणाम् अध्ययनम्, देवभाषायाः सम्प्रसारणं, शिक्षाक्षेत्रेषु नीतिशिक्षायाः संयोजनं, सदाचारस्य पालनम् इत्याद्युपेता स्थितिः पुनरागच्छेत् भारतीये जनमानसे । अन्यथा भारतीया संस्कृतिः इतोऽपि विनश्येत् । एतदर्थं प्रत्येकं भारतीयानां स्वदायित्वमस्ति, सर्वैः प्रयत्नः करणीयः । पितरः स्वसन्ततिभ्यः स्वगृहे एव सुसंस्कारं दद्युः। ते शिष्टाचारिणः विनयशीलाः च कथं भवेयुः इति विषये अभिभावकाः सावधानपूर्वकं तेषाङ्कृते प्रयत्नं कुर्युः। समुचितशिक्षया हि ते सन्ततयः अग्रे गत्वा देशस्य महान्तो जनाः, सत्पुरुषाः वा भवेयुः । सच्छिक्षा हि मानवस्य सुव्यक्तित्वं निर्माति । सनातनवाङ्मये सा शिक्षा निहिता वर्तते । तदुद्घाट्य स्वयम् अधीत्य च बालाः अपि प्रेरणीयाः ज्येष्ठैः। एवञ्चेत् जनसमाजः विकासदिशि अग्रे सर्तुमर्हेत् । यदि शिक्षायाः मानदण्डः निम्नस्तरीयः भवेत् तर्हि समाजः स्वयं निम्नगामी स्यात्, जनमानसं च न कदापि विकासदिशि प्रसरेत् । अतः समाजे सच्छिक्षा हि प्रशस्या, लाभप्रदा च भवति सदा, परन्तु निम्नस्तरीयया, बौधिकतत्त्वरहितया वा शिक्षया तु समाजस्य लाभस्थाने हानिर्हि सञ्जायते । अतः इदमप्रथमया लोके सच्छिष्यायाः जागरणम् अनिवार्यम्। ततः हि धर्मसंरक्षणं स्वयमेव सम्भवति । यतोहि धर्मस्य मूलमेव सच्छिक्षणं वर्तते । तस्मात् सर्वैः मनुष्यैः जीवने स्वधर्मस्य संरक्षणम् अवश्यं कर्तव्यमिति, शम् ।

# बालबोधकथा-

## सिंहः मूषकः च (शेर और चूहा)



एकदा एकः सिंहः स्वगुहायां निद्रां करोति स्म। तदैव एकः लघुः मूषकः तत्र आगत्य सिंहस्य शरीरे इतस्ततः अकूर्दत्। तेन सिंहस्य निद्रा भग्ना अभवत्।

सिंहः अतीव क्रुद्धः अभवत्। सः मूषकं स्वहस्तेन अगृह्णात् हन्तुं च अचिन्तयत्। तदा मूषकः सविनयं प्रार्थयत्— "भो मृगराज! कृपया मां मा मारयतु। कदाचित् अहम् अपि भवतः साहाय्यं करिष्यामि।"

सिंहः प्रहस्य अचिन्तयत्— "एषः क्षुद्रः जन्तुः मम साहाय्यं कथं करिष्यति?" तथापि सः दयालुः आसीत्, अतः सः मूषकं मुक्तवान्।

कतिपय दिनानां अनन्तरं सः सिंहः एकस्य व्याधस्य (शिकारी) जाले बद्धः अभवत्। सः उच्चैः अगर्जत्। सिंहस्य गर्जनं श्रुत्वा सः मूषकः तत्र शीघ्रम् आगच्छत्। मूषकः स्वतीक्ष्णदन्तैः जालं अकृन्तत् (काट दिया)।

सिंहः जालात् मुक्तः अभवत्। सः मूषकं प्रति कृतज्ञतां प्रकटितवान्। ततः आरभ्य सिंहः मूषकः च परममित्राणि अभवन्।

**शिक्षाः** कोऽपि जन्तुः लघुः न भवति, समयस्य आवश्यकतानुसारं सर्वेऽपि साहाय्यं कर्तुं शक्नुवन्ति।

# हिमाचलप्रदेशे बस्तीनां, ग्रामाणां, वीथीनां च अपमानजनक-नामानि परिवर्तयिष्यन्ते

National
Human
Rights
Commission
(NHRC)

**हिमसंस्कृतवार्ताः - काङ्गड़ा।**

हिमाचलप्रदेशे अधुना तासां पञ्चायतानां, ग्रामाणं, वीथीनां च परिचयः समाप्स्यते, येषां नामानि जातिसूचकानि अथवा अपमानजनकानि सन्ति। मानवाधिकार-आयोगस्य (Human Rights Commission) कठोर-निर्देशानन्तरं जिला-प्रशासनेन एषा प्रक्रिया तीव्रीकृता। मण्डल-पञ्चायताधिकारिणा सर्वे खण्ड-विकास-अधिकारिणः (BDO) आदिष्टाः यत् ते स्वक्षेत्रेषु एतादृशानां नाम्नां सूचीं तान् परिवर्तयितुं प्रस्तावान् च प्रेषयन्तु।

**आयोगस्य निर्देशः याचिका चः**

एषा सम्पूर्ण-प्रक्रिया मानवाधिकार-आयोगस्य आदेशानुसारं क्रियते। 'डॉ. आम्बेडकर जन कल्याण समिति भोपाल' इत्यस्य अध्यक्षेण सुनील अहिरवार महोदयेन आयोगस्य न्यायालये याचिका दापिता आसीत्। आयोगेन स्पष्टीकृतं यत् समाजे समानता-स्थापनाय तादृशानि नामानि निष्कासयितुं अनिवार्यं वर्तते, यानि कस्यचित् विशिष्ट-वर्गस्य कृते अपमानजनकानि प्रतीयन्ते।

**प्रशासकीय-प्रक्रियाः**

१. प्रशासनं तासां प्राचीन-बस्तीनां मोहल्लानां च परिचयं करोति येषां नामानि जाति-आधारितानि सन्ति।

२. पञ्चायत-सचिवाः खण्ड-विकास-अधिकारिणः च प्रत्येकं लघु-बृहत-कस्बानां वीथीनां च सूक्ष्म-निरीक्षणं करिष्यन्ति।

३. सूचना-सङ्कलने किमपि त्रुटिः न भवेत्, एतदर्थं 'गूगल-शीट्' (Google Sheet) इत्यस्य उपयोगः क्रियते।

प्रशासकीय-अधिकारिणां मतमस्ति यत् एषः पदक्षेपः न केवलं वैधानिक-अनिवार्यता अस्ति, अपितु नागरिकाणां आत्मसम्मानेन अपि सम्बद्धः अस्ति। आगामि-दिनेषु एतेषां स्थानानां नूतनानि नामानि स्थापयिष्यन्ते, येन समाजे एकं समावेशी (Inclusive) सम्मानजनकं च वातावरणं निर्मितं भविष्यति।

# त्रिलोकपुर-मन्दिरम् (हिमाचलप्रदेशः)



त्रिलोकपुर-मन्दिरं भारतस्य हिमाचलप्रदेशराज्यस्य सिरमौर-जनपदे त्रिलोकपुरग्रामे स्थितं एकं पवित्रं हिन्दू-मन्दिरं वर्तते। एतत् मन्दिरं नाहन-नगरात् प्रायः २४ कि.मी. दूरे, ४३० मीटर् (१,४१० पादमिते) उन्नते पर्वते स्थितम् अस्ति।अस्य क्षेत्रस्य वैशिष्ट्यं वर्तते यत् अत्र एकस्य त्रिकोणस्य त्रिषु कोणेषु देव्याः दुर्गायाः त्रीणि मन्दिराणि सन्ति, यत्र देव्याः पृथक्-पृथक् स्वरूपाणि पूज्यन्ते।

**मुख्यमन्दिरम्:** त्रिलोकपुरे स्थितं मुख्यं मन्दिरं भगवती-त्रिपुर-बाला-सुन्दर्याः अस्ति। अत्र देवी दुर्गायाः बालावस्थायाः स्वरूपं विराजमानम् अस्ति।

**द्वितीयं मन्दिरम्:** इतः ३ कि.मी. दूरे भगवती-ललिता-देव्याः भव्यं मन्दिरं वर्तते।

**तृतीयं मन्दिरम्:** मुख्यमन्दिरात् १३ कि.मी. पश्चिमोत्तरदिशि देव्याः तृतीयं स्वरूपं स्थितम् अस्ति।

विगतेषु दशकेषु भगवती-बाला-सुन्दर्याः एतत् स्थानं अतीव विख्यातं सञ्जातम्। हिमाचलप्रदेशस्य अन्येभ्यः प्रसिद्धेभ्यः मन्दिरेभ्यः (यथा—चिन्तपूर्णी, नैना-देवी, ज्वाला-देवी, चामुण्डा-देवी च) अपि अधिकं भक्ताः नवरात्रोत्सवे अत्र दर्शनार्थं आगच्छन्ति। यथा उत्तरप्रदेशस्य सहारनपुरे स्थिते शाकम्भरी-देवी मन्दिरे लक्षाधिकाः भक्ताः एकत्रिताः भवन्ति

# भारतीयसंस्कृतिरक्षणे दरभंगाराजपरिवारस्य योगदानम्



✍ डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी,भागलपुर, बिहार

भारतीयसंस्कृतिः न केवलं जीवनपद्धतिः, अपि तु सहस्राब्दानां साधना, आस्था, विद्या, कला, धर्म, दर्शन, लोकाचाराणां च समन्वितं रूपम् अस्ति। अस्याः संस्कृतेः संरक्षणे विभिन्नाः राजवंशाः, मठाः, आचार्याः, कवयः, कलाकाराश्च निरन्तरं योगदानं कृतवन्तः। एतेषु राजवंशेषु मिथिलायाः दरभंगाराजपरिवारः विशेषतया उल्लेखनीयः वर्तते। अस्य राजपरिवारस्य योगदानं केवलं राजनैतिकक्षेत्रे न सीमितम्, अपि तु संस्कृतभाषायाः, वेदशास्त्राणां, साहित्यस्य, संगीतस्य, कलानां, धार्मिकपरम्पराणां च संरक्षणे व्यापकं दीर्घकालीनं च आसीत्। मिथिला प्राचीनकालात् एव विद्यासंस्कृत्योः केन्द्रं मन्यते। वैदेहजनकस्य राज्ये, सीतामातुः जन्मभूमौ, याज्ञवल्क्य-गार्गी-मैत्रेयीप्रभृतिभिः ऋषिभिः अलंकृते अस्मिन् प्रदेशे वेदोपनिषदां, स्मृतिपुराणानां, न्यायदर्शनस्य, मीमांसायाः च परम्परा सुदृढा आसीत्। एतादृशीं गौरवपूर्णां परम्परां दरभंगाराजपरिवारः उत्तराधिकाररूपेण प्राप्तवान्, तस्याः संरक्षणे च स्वजीवनं समर्पितवान्। दरभंगाराजपरिवारः, यः सामान्यतया ‘मिथिलाराजपरिवारः’ इति अपि नाम्ना अपि ख्यातः, कर्णाटवंशस्य उत्तराधिकारी मन्यते। कालान्तरं ब्रिटिशशासनकाले अपि अस्य राजपरिवारस्य सामाजिकसांस्कृतिकप्रभावः अक्षुण्णः आसीत्। यद्यपि राजनैतिकसत्ता सीमिता जाता, तथापि सांस्कृतिकनेतृत्वं, विद्वत्संरक्षणं, धार्मिकानुष्ठानानां प्रवर्तनं च अविरतं प्रवहति स्म।

दरभंगाराजपरिवारस्य सर्वाधिकं प्रशंसनीयं योगदानं संस्कृतभाषायाः संरक्षणे दृश्यते। एते राजानः संस्कृतं न केवलं राजभाषारूपेण, अपि तु जीवितभाषारूपेण स्वीकरोति स्म। राजसभासु संस्कृतपण्डितानां समागमः, शास्त्रार्थानां आयोजनम्, नवीनग्रन्थानां रचना प्रोत्साहनं च नित्यं भवति स्म।

महाराज लक्ष्मीश्वर सिंहः, महाराज रमेश्वर सिंहः, महाराज कामेश्वर सिंहः च संस्कृतविद्यानां महान् संरक्षकाः आसन्। एतेषां आश्रये अनेके पण्डिताः वेदान्, उपनिषदः, स्मृतयः, धर्मशास्त्राणि, न्यायव्याकरणमीमांसादर्शनानि च अध्यापयन्ति स्म। दरभंगाराजसभा तदा उत्तरभारतस्य प्रमुखेषु संस्कृतविद्याकेन्द्रेषु गणिता जाता। राजपरिवारः गुरुकुलपरम्परायाः संरक्षणे विशेषं ध्यानं दत्तवान्। मिथिलायां अनेके पाठशालाः, तोलाविद्यालयाः, विद्यापीठानि च राजाश्रयेण सञ्चालितानि आसन्। वेदाध्ययनं, वेदान्तः, स्मृतिः, तर्कः, व्याकरणं, काव्यशास्त्र च विद्यार्थिभ्यः निःशुल्कं प्रदीयते स्म। निर्धनविद्यार्थिनां कृते वृत्तिदानं, आवासव्यवस्था, भोजनव्यवस्था च राजकोषात् एव क्रियते स्म।भारतीयसंस्कृतिः धर्मेण सह अविच्छिन्ना विद्यते। दरभंगाराजपरिवारः वैदिकतान्त्रिकशैववैष्णवपरम्पराणां समन्वयकः आसीत्। राजपरिवारस्य कुलदेवी भगवती महाकाली आसीत्, यस्याः उपासना मिथिलायां विशेषरूपेण क्रियते । दुर्गापूजायाः भव्यायोजनं, नवरात्रोत्सवः, दीपोत्सवः, व्रतपर्वाणि च राजाश्रयेण सामाजिकरूपेण आयोज्यन्ते स्म। महामहोपाध्यायाः, तान्त्रिकाः, आचार्याश्च राजसभाम् अलंकुर्वन्ति स्म। तेषां मार्गदर्शनेन यज्ञाः, अनुष्ठानानि, धर्मसभाः च नियमितरूपेण भवन्ति स्म। एतेन न केवलं धार्मिकास्था दृढीभूता, अपि तु समाजे नैतिकमूल्यानां संरक्षणं अपि जातम्।

भारतीयसंस्कृतौ कलानां महत्त्वं विशिष्टम् अस्ति ।दरभंगाराजपरिवारः शास्त्रीयसंगीतस्य, नृत्यस्य, नाट्यस्य च महान् संरक्षकः आसीत्। मिथिलायां ध्रुपद-संगीतपरम्परा विशेषतया विकसिताभूत्। राजसभा महान् संगीतविद्याकेन्द्रं जातम्, यत्र सुप्रसिद्धाः गायकाः, वादकाः, नर्तकाः च सम्मानं, आश्रयं च प्राप्तवन्तः। मिथिलाचित्रकला (मधुबनी-चित्रकला) अपि राजाश्रयेण विकसिताभूत्। ग्राम्यकलाकाराः, स्त्रियः विशेषतया, धार्मिककथानां, रामायण-महाभारतादिकथानां, लोकजीवनस्य च चित्रणं कुर्वन्ति स्म। राजपरिवारः एतां लोककलां संरक्षणं दत्त्वा अन्तर्राष्ट्रियख्यातिं प्रापयत्।

दरभंगाराजपरिवारः संस्कृतमैथिलीसाहित्ययोः महान् पोषकः आसीत्। मैथिलीभाषा, या विद्यापतेः काव्येन सुविख्याता, राजाश्रयेण पुनः समृद्धिं प्राप्तवती। संस्कृतकवयः, नाटककाराः, इतिहासकाराः च राजसभायां सम्मानं लब्धवन्तः। अनेके ग्रन्थाः राजाश्रयेण रचिताः, मुद्रिताश्च। संस्कृतिरक्षणं केवलं ग्रन्थेषु न, अपि तु सामाजिकजीवने अपि आवश्यकम् अस्ति।दरभंगाराजपरिवारः सामाजिकसुधारकार्येषु अपि अग्रणी आसीत्। शिक्षाप्रसारः, नारीशिक्षायाः प्रोत्साहनम्, धार्मिकसहिष्णुता, जातीयसमन्वयः च तेषां नीत्याः भागः आसीत्। एते उपायाः संस्कृतेः जीवन्ततां रक्षितवन्तः।

ब्रिटिशशासनकाले पाश्चात्यसंस्कृतेः प्रभावः तीव्रः आसीत्। तस्मिन् काले दरभंगाराजपरिवारः भारतीयसंस्कृतेः स्वाभिमानं रक्षितवान्। पाश्चात्यशिक्षायाः स्वीकरणं कुर्वन् अपि, स्वीयमूल्यानि, परम्पराः, धर्मः, भाषा च न त्यक्ताः। एषः समन्वयदृष्टिकोणः भारतीयसंस्कृतेः निरन्तरतां सुनिश्चितवान्।

स्वतंत्रतासङ्ग्रामे प्रत्यक्षराजनीतिकभूमिका एतस्य परिवारस्य यद्यपि सीमिता आसीत्, तथापि सांस्कृतिकराष्ट्रवादस्य पोषणं दरभंगाराजपरिवारः अविरतं कृतवान्। स्वतंत्रोत्तरकाले अपि शिक्षासंस्थाः, धार्मिकमठाः, सांस्कृतिकसंस्थाः च तेषां प्रेरणया कार्यं कुर्वन्ति। संस्कृतभाषायाः संरक्षणम्, शास्त्रीयविद्यायाः संवर्धनम्, धार्मिकपरम्पराणां पोषणम्, कलासाहित्ययोः उन्नतिः, समाजसुधारः च एते सर्वे पक्षाः अस्य योगदानस्य साक्षिणः सन्ति। यदि अद्य अपि मिथिला विद्या, धर्म, कला च इत्येतैः क्षेत्रैः गौरवेण स्मर्यते, तर्हि तस्य मूलं दरभंगाराजपरिवारस्य एव दूरदर्शिनीतिः, सांस्कृतिकनिष्ठा, सेवाभावना च निहिता आसीत्।

असौ राजपरिवारः केवलं पारम्परिकविद्यायाः न, अपि तु आधुनिकशिक्षायाः अपि उदारः संरक्षकः आसीत्।दरभंगाराजपरिवारः भारतीयशिक्षासंस्कृतिसंरक्षणे अद्वितीयं योगदानं कृतवान्। दरभंगानगरे राजपरिवारेण ललितनारायणमिथिलाविश्वविद्यालयः, कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः च स्थापितौ, ययोः अन्तर्गते अनेके महाविद्यालयाः, संचालिताः सन्ति । तथैव अनेन परिवारेण मिथिलाक्षेत्रे शिक्षाशालाभ्यः भूमिदानं, भवननिर्माणं, धनदानं च उदारतया कृतम्।

पाटलिपुत्रे राजपरिवारेण “दरभंगा-हाउस” इति प्रसिद्धं भव्यं भवनं निर्मापितम्,यत् शैक्षणिकसांस्कृतिकप्रशासनिककार्येषु उपयोगी अभवत्।एतद् अतिरिक्तं काशीनगरे (वाराणसी), दिल्लीनगरे, कलकत्तानगरे तथा अन्येषु विविधेषु स्थानेषु

दरभंगाराजपरिवारेण भवनानि निर्मितानि सन्ति। राजपरिवारेण विश्वविद्यालयेभ्यः, महाविद्यालयेभ्यः, धार्मिकसंस्थाभ्यः च भूमिधनसुवर्णरूपेण दानं समर्पितम्।

अलीगढ़मुस्लिमविश्वविद्यालयस्य स्थापनाविकासयोः दरभंगाराजपरिवारस्य महत्त्वपूर्णम् आर्थिकं योगदानम् अभवत्।

तथैव काशीहिन्दूविश्वविद्यालयस्य निर्माणार्थं महाराजाधिराजैः उदारतया धनं प्रदत्तम्।इतिहासप्रसिद्धं यत्,दरभंगाराजपरिवारेण राष्ट्रहिताय प्रायः षट्शतकिलोग्रामपरिमितं सुवर्णम् (600किलो सोना) दानरूपेण समर्पितम्।एतादृशेन त्यागेन, दानशीलतया च,अयं राजपरिवारः भारतीयशिक्षासंस्कृतिसंरक्षणे आदर्शरूपेण प्रतिष्ठितः अभवत्।एवं प्रकारेण दरभंगाराजपरिवारः न केवलं मिथिलायाः,अपि तु सम्पूर्णभारतस्य शैक्षणिकसांस्कृतिकविकासे महत्त्वपूर्णं योगदानं कृतवान्। एतेषां कार्याणि राष्ट्रभक्तेः, जनकल्याणस्य, सांस्कृतिकगौरवस्य च उत्कृष्टम् उदाहरणं वर्तते।समग्रतया वयं वक्तुं शक्नुमो यत् दरभंगाराजपरिवारः भारतीयसंस्कृतिरक्षणे एकः अद्वितीयः आदर्शः आसीत्। एतादृशं योगदानं न केवलं मिथिलायाः, अपि तु सम्पूर्णभारतस्य सांस्कृतिकइतिहासे स्वर्णाक्षरैः लिखितम् अस्ति। वयं एतान् राजपरिवारान् प्रति श्रद्धापूर्वकं वन्दनं समर्पयामः।

## लौकिकन्यायकोशः*" (३९२)

## अन्धाक्षिमीलनन्यायः

अन्धः नेत्रे उन्मीलयति निमीलयति चेदपि किं तेन? निष्प्रयोजनम् एव खलु | कस्याम् अपि अवस्थायां किमपि न दृश्येत | तस्य शारीरिकानां क्रियाणां परिणामः न भवति | एतस्मिन् अर्थे अस्य न्यायस्य प्रयोगः भवति |

डा. वर्षा प्रकाश
टोणगांवकर पुणे / महाराष्ट्रम्



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी**- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या**- नमस्ते नन्दिनी। अद्य मया एकम् उत्तमम् अनुसंधानं पठितम्।

**नन्दिनी**- किं तत्?

**काव्या**- वैज्ञानि कैः ज्ञातं यत् विशिष्ट-सङ्गीतेन चिन्ता दूरीकृता। केवलं चतुर्विंशति-निमेषेषु मनःशान्तिः लब्धा।

**नन्दिनी**- तत् तु बहु शोभनम्। औषधं विना चिकित्सा जाती। द्वितीयं वृत्तं किम्?

**काव्या**- द्वितीयं तु भयावहम्। मुखस्य जीवाणुभिः स्तन-कर्कटरोगः जनितः इति दृष्टम्।

**नन्दिनी**- अहो! दन्त-शुद्धिः आवश्यकी खलु। तृतीयं समाचारं श्रावय।

**काव्या**- अन्त्र-शोथेन पक्वाशय-कर्कटरोगः कथं वर्धितः इति ज्ञातम्। शरी रस्य रक्षण-तन्त्रेण एव समस्या उत्पादिता।

## हास्यकणिका

### चतुरः जामाता (चतुर दामाद)

**श्वशुरः**: जामाता महोदय! भवान् तु सर्वदा भोजनसमये एव आगच्छति। किं कारणम्?

**जामाताः** किमपि नास्ति तात! मम गृहस्य घटी (घड़ी) मन्दं चलति, परन्तु मम उदरस्य घटी (पेट की घड़ी) सर्वदा सम्यक् चलति!

### एकं लघु प्रहसनम्

**पुत्रः**: पितः! अहं 'विवाहः' इति विषयस्य उपरि निबन्धं लेखितुं वाञ्छामि।

**पिताः** अस्तु वत्स! लिखतु। परन्तु स्मरतु, एषः निबन्धः केवलं 'काल्पनिकः' भवितुमर्हति, यतः विवाहितः पुरुषः कदापि 'शान्त्या' निबन्धं लेखितुं न शक्नोति!